# सिंह शशकः

मन्दरपर्वते दुर्दान्तः नाम सिंहः वसति स्म। सः च सर्वदा बहूनाम् पशूनाम् वधम् करोति स्म। एकदा सर्वे पशवः सिंहस्य समीपम् अगच्छन् अवदन् च - मृगेन्द्र! त्वम् किमर्थम् सर्वदा पशूनाम् वधम् करोषि? प्रसीद। वयम् स्वयम् तव भोजनाय प्रतिदिनम् एकम् पशुम् प्रेषयिष्यामः।

ततः सिंहः अवदत् - "यदि यूयम् एवम् इच्छथ, तर्हि भवतु तत्।" ततः प्रभृति एकः पशुः प्रतिदिनम् क्रमेण सिंहस्य समीपम् गच्छति स्म।

एकदा एकस्य शशकस्य वारः समायातः। सः अचिन्तयत् - 'यदि मम मरणम् निश्चितम् एव, तर्हि मन्दम् एव गच्छामि'। सः अतिविलम्बेन सिंहस्य समीपम् अगच्छत्।

तत्र सिंहः तु क्षुधया अतिपीडितः आसीत्। अतिक्रुद्धः सः शशकम् अपृच्छत् , "त्वम् विलम्बात् कुतः आगच्छः?" शशकः विनयेन अवदत् - "महाराज! न मम दोषः। मार्गे अपरः सिंहः आसीत् , सः माम् अपश्यत् अवदत् च, "अहम् अस्य वनस्य राजा। अहम् त्वाम् भक्षयिष्यामि।" अहम् तम् अवदम् अस्य वनस्य राजा तु दुर्दान्तः नाम सिंहः अस्ति। सः अद्य माम् भक्षयिष्यति। अहम् अधुना तस्य भोजनाय गच्छामि। एतत् श्रुत्वा सः सिंहः अतिक्रुद्धः अभवत्। अहम् अत्र पुनः अगमिष्यामि' इति शपथं कृत्वा अत्र आगच्छम्।

दुर्दान्तः क्रोधेन अवदत् –'रे शठ! कुत्र अस्ति सः अपरः सिंहः? तम् सत्वरम् माम् दर्शय'। शशकः सिंहम् एकस्य गंभीरस्य कूपस्य

समीपम् अनयत् अकथयत् च –"पश्यतु महाराज! अस्मिन् कूपे एव सः सिंहः वसति।"

तस्य कूपस्य जले दुर्दान्तः स्व प्रतिबिम्बम् अपश्यत् अवदत् च – 'अयम् एव सः सिंहः?' क्रोधेन परिपूर्णः सः दुर्दान्तः आत्मानं कूपे अक्षिपत् पञ्चत्वम् च अगच्छत्।